VI- Semester BA (CBCSS)

Core Course in Sanskrit (Special) Vyakarana

**Code -X**- PROUDHAMANORAMA

(Samjna, Paribhasha and Ac Sandhi Prakaranas only)

(Sample question paper)

Time: Three Hours　　　　　　　　　　　　Maximum: Weight- 25

संस्कृतभाषया उत्तराणि देयानि।

देवनागरीलिपिरुपयोक्तव्या।

**Part-A**

Answer all questions from this part.

Each bunch of four questions carries a weight of 1.

**(1-16) पदेनैकेन समाधत्त।**

**I.** 1. हयवरट्-सूत्रे हकारोपदेशः किमर्थम्?

2. अर्हेण- इत्यत्र णत्वं केन सूत्रेण भवति?

3. उपदेशेऽजनुनासिक इत्- इति सूत्रे अच् इति किम्?

4. प्रत्याहाराः - इत्यस्य विग्रहः कः?

**II.** 5. ननु रलयोरिति न्यूनम्- कुतः ?

6. अर्वाङ्- इत्यत्र केन सूत्रेण अकारः अनुदात्तः?

7. षष्ठी स्थानेयोगा- इति सूत्रे स्थानेयोगा इत्यस्य विग्रहः कः?

8. अनचि च -इति सूत्रे कस्मात् सूत्रात् वाग्रहणमनुवर्तते?

**III.** 9. क्षेयम्-इत्यत्र केन सूत्रेण यत् प्रत्ययः विधीयते?

10. एहि कृष्ण- इत्यत्र केन सूत्रेण प्लुतः विधीयते?

11. हलन्त्यम्- इति सूत्रस्य अर्थः कः?

12. वृद्धिरादैच्- ऐचिह द्विमात्र एव- कुतः?

**IV.**13.अदागाधाम्- इत्यत्र सकारलोपः केन सूत्रेण विधीयते?

14. न धातुलोप.........इति सूत्रे धातुग्रहणं किम्?

15. अनेकविधमान्तर्याः के्?

16. मध्यगानामित्यत्र आद्यन्ताभ्यामवयवाभ्यां कः आक्षिप्यते?

(4x1=4Weights)

**Part-B**

**(17-24) द्वित्रैः वाक्यैः पञ्च समाधत्त-**

**Each question carries a weight of-1**

17. मुखनासिकावचनः- इत्यस्य विग्रहः कः?

18. पूर्वत्रासिद्धम्- इति सूत्रस्य अर्थः कः?

19. भूवादयो धातवः- इति सूत्रे क्रियावाचिनः इति किम्?

20. सुप्तिङन्तं पदम्- इत्यत्र अन्तग्रहणेन किं ज्ञाप्यते?

21. तुल्यस्यप्रयत्नं सवर्णम्- इति सूत्रे तुल्यास्य इति किम्?

22. देवा हसन्ति- इत्यत्र रोर्यत्वं केन सूत्रेण विधीयते?

23. अकृतव्यूहाः पाणिनीयाः- इत्यस्य अर्थः कः?

24. सम्बुद्धौ शाकल्यस्य- इति सूत्रे सम्बुद्धौ इति किम्?

(5x1=5 Weights

**Part-C**

**(25-30) चत्वारि व्याख्यात-**

**Each question carries a weight of-2**

25. हल् सूत्रे हकारोपदेशप्रयोजनं प्रतिपादयत।

26. आदिरन्त्येन सहेता- अत्र मध्यगानामित्यर्थलाभः कथम्?

27. कौमुद्यां हलन्त्यमिति सूत्रं किमर्थं द्विवारमुच्यते?

28. ऋलृवर्णयोरित्यत्र विग्रहः कीदृशः इति यथाग्रन्थं प्रतिपादयत।

29. वृद्धिरादैच्- इति सूत्रं मनोरमादिशा व्याख्यात।

30. प्रत्याहाराश्च एकचत्वारिंशदिति प्राञ्चः। कथम्?

(4x2=8 Weights)

**Part-D**

**(31-33) द्वयोरुत्तरं लिखत-**

**Each question carries a weight of-4**

31. अतः भाव एव प्रत्यय न्यायमिति भावः। विशदयत।

32. इकोगुणवृद्धी- इति सूत्रं मरोरमादिशा व्याख्यात।

33. न पदान्तद्विर्वचन..........इति सूत्रं यथाग्रन्थं विशदयत।

(2x4=8Weights)

# Answer Key

1. अट् अश् हश् इण् ग्रहणेषु हकारग्रहणार्थः।

2. अट्कुप्वाङ्नुम्व्यवायेऽपि।

3. मनिनो मकारस्य मा भूत्।

4. प्रत्याह्रियन्ते संक्षिप्यन्ते वर्णाः यत्र।

5. टकारस्यापि मध्यगतत्वात्।

6. अनुदात्तं पदमेकवर्जम्।

7. स्थानेन योगो अस्य।

8. यरोऽनुनासिकेऽनुनासिको वा।

9. अर्हे कृत्यतृचश्च।

10. दूराद्धूते च।

11. उपदेशेऽन्त्यं हल् इत्स्यात्।

12. तात्परत्वात्।

13. झलो झलि।

14. लूञ् लविता, पूञ् पविता।

15. स्थानार्थगुणप्रमाणकृताः ।

16. अवयवीसमुदायः ।

17. मुखेन सहिता मुखसहिता, मुखसहिता चासौ नासिका च मुखनासिका, मुखसहितं वचनमस्य, मुखोपसहिता वा नासिकावचन यस्य सोऽयं मुखनासिकावचनः।

18. सपादसप्ताध्यायीं प्रति त्रिपाद्यसिद्धा, त्रिपाद्यामपि पूर्वं प्रति परं शास्त्रमसिद्धं स्यात्।।

19. ''याः पश्यसि'' इत्यादौ धातुत्वं मा भूत्। सति हि तस्मिन् ''आतो धातोः'' इति सूत्रेण आकारलोपः स्यात्।।

20. अन्तग्रहणेन ''सञ्ज्ञाविधौ प्रत्ययग्रहणे क्षदन्तग्रहणं नास्ति'' इति ज्ञाप्यते।।

21. तर्प्ता। अत्र पकारस्य तकारे परे ''झरो झरि'' इति लोपो मा भूत्।।

22.भो भगोअघो अपूर्वस्य योऽशि'' इति सूत्रेण।।

23. निमित्तं नाशोन्मुखं दृष्ट्वा तत्प्रयुक्तं कार्यं न कुर्वन्ति इत्यर्थः।।

24. अहो इति। अत्र परत्वात् विकल्पो मा भूत्।।

25. ''हल्'' । इदं सूत्रं वल् रल् झल् शल्षु हकारग्रहणार्थम्। रुदिहि स्वपिहि, ''रुदादिभ्यः सार्वधातुके'' इति वलादिलक्षण इट्। स्निहित्वा स्नेहित्वा, ''रलो व्युपधाद्हलादेः संश्च'' इति वा कित्वम्। अदाग्धाम्, ''झलो झलि'' इति सकारलोपः। अलिक्षत्, ''शल इगुपधादनिटः क्सः'' इति क्सः।।

26. आद्यन्ताभ्यामवयवाभ्यां अवयवीसमुदाय आक्षिप्यते, तस्य च युगपल्लक्ष्ये प्रयोगाभावात्तदवयवेष्ववतरन्ती सञ्ज्ञा मध्यगेषु विश्राम्यति, न तु आद्यन्तयोः, संज्ञास्वरूपान्तर्भावेण तयोः पारार्थ्यनिर्णयादिति भावः।।

27. हल् सूत्रे अन्त्यं इत् स्यात् इति सूत्रार्थः। हलि अन्त्यमिति विग्रहे सप्तमीति योगविभागात् सुप्सुपा इति वा समास इति भावः। यद्वा षष्ठीतत्पुरुषोऽयम्। स्यादेतत्। हलित्येकदेशस्यैव तन्त्रावृत्येकशेषान्यतरमस्तु। हस्य ल् इति च व्याख्यास्यते। सामीप्यं षष्ठ्यर्थः। यद्वा मास्तु तन्त्रादि। अस्तु समाहारद्वन्द्वो हल् च ल् चेति। लकारस्य संयोगान्तलोप इति चेत्, मैवम्। आद्ये समासस्य क्लिष्टत्वात्। न हि ब्राह्मणकम्बल इत्यादौ ब्राह्मणसमीपवर्त्यन्यदीयः कम्बलः प्रतीयते। न वा चित्रगुशब्दाच्चित्रगवीणांसमीपवर्ती वृक्षादिः प्रतीयते। द्वितीयेऽपि संयोगान्तलोपो दुर्लभः। यणः प्रतिषेधारम्भात्। तत्प्रत्याख्यानपक्षेऽपि झलो झलि इक्ष्यतो झल्ग्रहणमपकृष्य संयोगान्तस्य झलो लोपविधानाच्च। क्षस्मात् यथोक्तमेव न्यय्यम्।।

28. आ च आ च रलौ, तौ च तौ वर्णौ चेतिविग्रहः। अथवा उश्च उल् च ऋलोः, तयोर्वर्णयोरिति वा।। 29. ऐचिह द्विमात्र एव, तात्परत्वात्, तेन कृष्णैकत्वमित्यत्र त्रिमात्रो न। एवं अदेङ् गुणः- इति सूत्रेऽपि। तेन गङ्गोदकमित्यादौ त्रिमात्रो न।।

30. प्रत्याहाराश्च एकचत्वारिंशदिति प्राञ्चः। चतुर्दशसूत्रीस्थैर्हल्भिरिद्भिः कृता, अष्टाध्याय्यां व्यवहृता एकचत्वारिंशदिति तस्यार्थः। तद्यथा- ''एकस्मानि ङञणवटाः, द्वाभ्यां षस्त्रिभ्य एव कणमाः स्युः। ज्ञेयौ चयौ चतर्भ्यो, रः पञ्चभ्यः, शलौ षट्भ्यः'' इति। तेन सुष्क्षिङादीनां, रप्रत्याहारस्य, ''चयो द्वितीया'' इति वार्तिकस्थ चय् प्रत्याहारस्य च आधिक्येऽपि अदोषः।।

31. यद्यप्युपदिश्यतेऽन्नेति करणव्युत्पत्या शास्त्रमुपदेश इति भाष्यवृत्यादिषु व्याख्यातं, तथाऽपि तत्प्रौढिवादमात्रम्, करणे घञो दुर्लभत्वात्, ल्युटा बाधात्। न च घः, असंज्ञात्वात्। प्रयेण संज्ञायामिति व्याख्यानस्य क्लिष्टत्वात्। न हि उपाधेरुपाधिर्भवतीत्यादिना भाष्यकृतावहेलनाच्च। अत एव घापवादो हलश्च इति घञपीह न। बाहुलकं तु अगतिकगतिः। अत एव प्रक्रियन्ते सब्दा याभिरिति करणव्युत्पत्तिरपि परास्ता। तथा च वार्तिकम्- ''अजब्भ्यां स्त्रीखलनाः, स्त्रियाः खलनौ विप्रतिषेधेन'' इति। अतो भाव एव प्रत्यय न्याय्य इति भावः।।

32. गुणवृद्धिसंज्ञाब्यां यत्र गुणवृद्धी विधीयेते तत्र इक- इति षष्ट्यन्तं पदमुपतिष्ठते- इति सूत्रार्थः। अत्र गुणवृद्धिसंज्ञाभ्यामिति पूर्वसूत्राभ्यां गुणवृद्धी पदे अनुवर्त्य गुणो वृद्धिरिति ये गुणवृद्धी इति योजनया लभ्यते। तेनेह न- ''दिव औत् '' द्यौः। ''क्ष्यदादीनामः'' सः, इमम्।षष्ठ्यन्तमिति। सूत्रे षष्ठ्यन्तस्यानुकरणाच्छब्दस्वरूपपरतया नपुंसकात् सोः लुगिति भावः। पदमिति। तच्च सम्भवति सामानाधिकरण्ये इगन्तस्याङ्गस्येत्यादिक्रमेण सम्बध्यते। ''मिदेर्गुणः'' ''मृजेर्वृद्धिः '' इत्यादौ तु सामानाधिकरण्यासम्भवात् मिदिमृज्योरवयवस्य इक इति सम्बध्यते।यत्तु इक एव स्थाने स्तः- इति व्याख्यातम्, तच्च तट्टीकाकृतोक्तमनियमप्रसङ्गे नियमार्धमिदमित्यादि, तत्सर्वं भाष्यविरोधादुपेक्ष्यम्।तच्छेषपक्षं दूषयित्वा पदोपस्थितिपक्षस्यैव भाष्ये समर्थिततत्वादित्याहुः। तच्छेषपक्षेऽपि दूषणोद्धारस्तु शब्दकौस्तुभे स्पष्टीकृतमस्माभिः।।

33. पदस्य चरमावयवे द्विर्वचनादौ च कर्तव्ये परनिमित्तोऽजादेशो न स्थानिवत्- इति सूत्रार्थः। पदस्य चरमावयव इति। वृक्षं वेतीति वृक्षवीः, वातीति वृक्षवाः, तमाचष्टे वृक्षव्, विच्। इह ''लोपो व्योर्वलि'' इति वलोपो न, स्थानिवत्वात्। न च ''न पदान्त...... '' इति निषेधः, इह विधेयस्य लोपस्य पदानवयवत्वात्। पदान्तस्य स्ताने विधौ नेति व्याख्याने तु नेदं सिद्ध्येत्। द्विर्वचनादौ चेति- यलोपादय आदिशब्दग्राह्याः ''वरे '' इति तु वरे योऽजादेशः स न स्थानिवदिति व्याख्येयम्। सहविवक्षाऽभावेऽपि निपातनात् द्वन्द्वः, सप्क्षम्यलुक् च।अथ उदाहरणानि-(१) पदान्ते- कानि सन्ति, कौ स्तः। (२) द्विर्वचने- सुद्ध्युपास्यः। (३) वरे- यायावरः। ''यश्च यङः'' इति वरच्। अक्षो लोपः स च ''आतो लोप इटि च'' इक्ष्यालोपे कर्तव्ये न स्थानिवत्।(४) यलोपे- यातिः। यातेर्यङन्तात् क्तिच्, अक्षो लोपः। (५) स्वरे- चिकीर्षः। सनोऽक्षो लोपो ''लिति'' इति ककारेकारस्य उदात्तत्वे कर्तव्ये न स्थानिवत्।(६,७) सवर्णानुस्वारयोः- शिण्ढि।(८) दीर्घे- प्रतिदीव्ना।(९) जशि- सन्धिश्च मे। अदनं ग्धिः।